শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীৱরৱরমুনিভিরনুগৃহীতং

# ॥ শ্রীদেৱরাজমঙ্গলম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীদেৱরাজমঙ্গলম্ ॥

যশ্চক্রে দেৱরাজস্য মঙ্গলাশাসনং মুদা।
তং ৱন্দে রম্যজামাতৃমুনিং ৱিশদৱাগ্ৱরম্॥

মঙ্গলং ৱেধসো ৱেদিমেদিনীগৃহমেধিনে।
ৱরদায দযাধাম্নে ধীরোদারায মঙ্গলম্॥ 1॥

ৱাজিমেধে ৱপাহোমে ধাতুরুত্তরৱেদিতঃ।
উদিতায হুতাদগ্নেরুদারাঙ্গায মঙ্গলম্॥ 2॥

যজমানং ৱিধিং ৱীক্ষ্য স্মযমানমুখশ্রিযে।
দযামানদৃশে তস্মৈ দেৱরাজায মঙ্গলম্॥ 3॥

ৱারিদশ্যামৱপুষে ৱিরাজৎপীতৱাসসে।
ৱারণাচলৱাসায ৱারিজাক্ষায মঙ্গলম্॥ 4॥

অদ্যাপি সর্ৱভূতানামভীষ্টফলদাযিনে।
প্রণতার্তিহরাযাস্তু প্রভৱে মম মঙ্গলম্॥ 5॥

দিৱ্যাৱযৱসৌন্দর্যদিৱ্যাভরণহেতযে।
দন্তাৱলগিরীশায দেৱরাজায মঙ্গলম্॥ 6॥

পুরুষায পুরাণায পুণ্যকোটিনিৱাসিনে।
পুষ্পিতোদারকল্পদ্রুকমনীযায মঙ্গলম্॥ 7॥

কাঞ্চনাচলশৃঙ্গাগ্রকালমেঘানুসারিণে।
সুপর্ণাংসাৱতংসায সুররাজায মঙ্গলম্॥ 8॥

ভোগাপৱর্গযোরেকং ৱাঞ্ছদ্ভ্যো দদতে দ্ৱযম্।
শ্রীমদ্ৱরদরাজায মহোদারায মঙ্গলম্॥ **9**॥

মতঙ্গজাদ্রিতুঙ্গাগ্রশৃঙ্গশৃঙ্গারৱর্ষ্মণে।
মহাকৃপায মদ্রক্ষাদীক্ষিতাযাস্তু মঙ্গলম্॥ **10**॥

শ্রীকাঞ্চীপূর্ণমিশ্রেণ প্রীত্যা সর্ৱাভিভাষিণে।
অতীতার্চাৱ্যৱস্থায হস্ত্যদ্রীশায মঙ্গলম্॥ **11**॥

অস্তু শ্রীস্তনকস্তূরীৱাসনাৱাসিতোরসে।
শ্রীহস্তিগিরিনাথায দেৱরাজায মঙ্গলম্॥ **12**॥

মঙ্গলাশাসনপরৈঃ মদাচার্যপুরোগমৈঃ।
সর্ৱৈশ্চ পূর্ৱৈরাচার্যৈঃ সৎকৃতাযাস্তু মঙ্গলম্॥ **13**॥

॥ ইতি শ্রীদেৱরাজমঙ্গলং সমাপ্তম্॥

sunder kidambi prapatti dot com sunder kidambi